# mRitasanjIvana stotram

# મૃતસઞ્જીવનસ્તોત્રમ્

## Document Information

Text title : mRitasanjIvana stotram

File name : mrtyusanjiivana.itx

Category : kavacha, shiva, stotra, gaNapati-muni

Location : doc_shiva

Author : vasiShThamunI

Transliterated by : Subramanian Ganesh sgesh at hotmail.com

Proofread by : Subramanian Ganesh sgesh at hotmail.com NA

Latest update : March 15, 2001, January 20, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# મૃતસઞ્જીવનસ્તોત્રમ્

એવમારાધ્ય ગૌરીશં દેવં મૃત્યુઞ્જયેશ્વરમ્ ।
મૃતસઞ્જીવનં નામ્ના કવચં પ્રજપેત્સદા ॥ ૧॥

સારાત્સારતરં પુણ્યં ગુહ્યાદ્ગુહ્યતરં શુભમ્ ।
મહાદેવસ્ય કવચં મૃતસઞ્જીવનાભિધમ્ ॥ ૨॥ var નામકમ્
સમાહિતમના ભૂત્વા શ‍ૃણુષ્વ કવચં શુભમ્ ।
શ‍ૃત્વૈતદ્દિવ્ય કવચં રહસ્યં કુરુ સર્વદા ॥ ૩॥

વરાભયકરો યજ્વા સર્વદેવનિષેવિતઃ ।
મૃત્યુઞ્જયો મહાદેવઃ પ્રાચ્યાં માં પાતુ સર્વદા ॥ ૪॥

દધાનઃ શક્તિમભયાં ત્રિમુખં ષડ્ભુજઃ પ્રભુઃ ।
સદાશિવોઽગ્નિરૂપી મામાગ્નેય્યાં પાતુ સર્વદા ॥ ૫॥

અષ્ટાદશભુજોપેતો દણ્ડાભયકરો વિભુઃ ।
યમરૂપી મહાદેવો દક્ષિણસ્યાં સદાઽવતુ ॥ ૬॥

ખડ્ગાભયકરો ધીરો રક્ષોગણનિષેવિતઃ ।
રક્ષોરૂપી મહેશો માં નૈરૃત્યાં સર્વદાઽવતુ ॥ ૭॥

પાશાભયભુજઃ સર્વરત્નાકરનિષેવિતઃ ।
વરૂણાત્મા મહાદેવઃ પશ્ચિમે માં સદાઽવતુ ॥ ૮॥

ગદાભયકરઃ પ્રાણનાયકઃ સર્વદાગતિઃ ।
વાયવ્યાં મારુતાત્મા માં શઙ્કરઃ પાતુ સર્વદા ॥ ૯॥

શઙ્ખાભયકરસ્થો માં નાયકઃ પરમેશ્વરઃ ।
સર્વાત્માન્તરદિગ્ભાગે પાતુ માં શઙ્કરઃ પ્રભુઃ ॥ ૧૦॥

શૂલાભયકરઃ સર્વવિદ્યાનમધિનાયકઃ ।
ઈશાનાત્મા તથૈશાન્યાં પાતુ માં પરમેશ્વરઃ ॥ ૧૧॥

ઊર્ધ્વભાગે બ્રહ્મરૂપી વિશ્વાત્માઽધઃ સદાઽવતુ ।
શિરો મે શઙ્કરઃ પાતુ લલાટં ચન્દ્રશેખરઃ ॥ ૧૨॥

ભ્રૂમધ્યં સર્વલોકેશસ્ત્રિનેત્રો લોચનેઽવતુ ।
ભ્રૂયુગ્મં ગિરિશઃ પાતુ કર્ણૌ પાતુ મહેશ્વરઃ ॥ ૧૩॥

નાસિકાં મે મહાદેવ ઓષ્ઠૌ પાતુ વૃષધ્વજઃ ।
જિહ્વાં મે દક્ષિણામૂર્તિર્દન્તાન્મે ગિરિશોઽવતુ ॥ ૧૪॥

મૃતુય્ઞ્જયો મુખં પાતુ કણ્ઠં મે નાગભૂષણઃ ।
પિનાકી મત્કરૌ પાતુ ત્રિશૂલી હૃદયં મમ ॥ ૧૫॥

પઞ્ચવક્ત્રઃ સ્તનૌ પાતુ ઉદરં જગદીશ્વરઃ ।
નાભિં પાતુ વિરૂપાક્ષઃ પાર્શ્વૌ મે પાર્વતીપતિઃ ॥ ૧૬॥

કટિદ્વયં ગિરીશો મે પૃષ્ઠં મે પ્રમથાધિપઃ ।
ગુહ્યં મહેશ્વરઃ પાતુ મમોરૂ પાતુ ભૈરવઃ ॥ ૧૭॥

જાનુની મે જગદ્ધર્તા જઙ્ઘે મે જગદમ્બિકા ।
પાદૌ મે સતતં પાતુ લોકવન્દ્યઃ સદાશિવઃ ॥ ૧૮॥

ગિરિશઃ પાતુ મે ભાર્યાં ભવઃ પાતુ સુતાન્મમ ।
મૃત્યુઞ્જયો મમાયુષ્યં ચિત્તં મે ગણનાયકઃ ॥ ૧૯॥

સર્વાઙ્ગં મે સદા પાતુ કાલકાલઃ સદાશિવઃ ।
એતત્તે કવચં પુણ્યં દેવતાનાં ચ દુર્લભમ્ ॥ ૨૦॥

મૃતસઞ્જીવનં નામ્ના મહાદેવેન કીર્તિતમ્ ।
સહસ્રાવર્તનં ચાસ્ય પુરશ્ચરણમીરિતમ્ ॥ ૨૧॥

યઃ પઠેચ્છૃણુયાન્નિત્યં શ્રાવયેત્સુસમાહિતઃ ।
સ કાલમૃત્યું નિર્જિત્ય સદાયુષ્યં સમશ્નુતે ॥ ૨૨॥

હસ્તેન વા યદા સ્પૃષ્ટ્વા મૃતં સઞ્જીવયત્યસૌ ।
આધયો વ્યાધયસ્તસ્ય ન ભવન્તિ કદાચન ॥ ૨૩॥

કાલમૃત્યુમપિ પ્રાપ્તમસૌ જયતિ સર્વદા ।
અણિમાદિગુણૈશ્વર્યં લભતે માનવોત્તમઃ ॥ ૨૪॥

યુદ્ધારમ્ભે પઠિત્વેદમષ્ટાવિંશતિવારકમ્ ।
યુદ્ધમધ્યે સ્થિતઃ શત્રુઃ સદ્યઃ સર્વૈર્ન દૃશ્યતે ॥ ૨૫॥

ન બ્રહ્માદીનિ ચાસ્ત્રાણિ ક્ષયં કુર્વન્તિ તસ્ય વૈ ।
વિજયં લભતે દેવયુદ્ધમધ્યેऽપિ સર્વદા ॥ ૨૬॥

પ્રાતરુત્થાય સતતં યઃ પઠેત્કવચં શુભમ્ ।
અક્ષય્યં લભતે સૌખ્યમિહ લોકે પરત્ર ચ ॥ ૨૭॥

સર્વવ્યાધિવિનિર્મૃક્તઃ સર્વરોગવિવર્જિતઃ ।
અજરામરણો ભૂત્વા સદા ષોડશવાર્ષિકઃ ॥ ૨૮॥

વિચરત્યખિલાઁલોકાન્પ્રાપ્ય ભોગાંશ્ચ દુર્લભાન્ ।
તસ્માદિદં મહાગોપ્યં કવચં સમુદાહૃતમ્ ॥ ૨૯॥

મૃતસઞ્જીવનં નામ્ના દેવતૈરપિ દુર્લભમ્ ॥ ૩૦॥ Only one line

॥ ઇતિ શ્રીવસિષ્ઠપ્રણિતં મૃતસઞ્જીવન સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Subramanian Ganesh

---

*mRitasanjIvana stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*